International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665

# पाञ्चरात्रागमे जितन्ते स्तोत्रस्य प्राधान्यता

**Dr.T.Pavan kumar,**

**Sanskrit Leturer,**

**Sri Chaitanya Junior Collage,**

**Tirupati**

अपौरुषेयो हि वेदः नित्यभारतीश्रृतिरूपःसर्वेषां धर्माणां सर्वेषां शास्त्राणामाधाररूपश्च। असौ तावत् सर्वेषामास्तिकानां परमप्रमाणभूतः। सकलसंस्कृतागम-दर्शन-पुराण-इतिहासादि वाङ्मयस्य अनाद्यनन्तरूपः।

**अनन्ता वै वेदाः**

**वेदोऽखिलो धर्ममूलम्**

**पुरुषार्थानां वेदयिता वेदः**

**विदन्त्यनेन धर्मः वेदः**

**निःश्रेयसकराणि कर्माण्यावेदयन्तीति वेदाः।**

इत्येतैः विशेषैः विद्यते वेदानामेव समुपादेयत्वं श्रेष्ठतमत्वं च।

**विद्यत इति सत्**

**वेत्ति तत्त्वमिति चित्**

**विन्दति चात्यन्तिकीं दुःखनिवृत्तिमित्यानन्द इति**

**वेदो हि सच्चिदानन्दात्मको ब्रह्मरूप इति अभ्युपगम्यते ।**

मन्त्रकदम्ब एव वेदः। मन्त्रकदम्बे अस्मिन् वेदे भगवतः स्वरूपं स्पष्टम् अभिवर्णितमासित् ते च मन्त्रास्तावत्।

International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665
IJRRAS

**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च**
**द्वे वा ब्रह्मणो रूपे मूर्तं चैवामूर्तं च**
**मर्त्यं चामृतं च स्थितं च यच्च सच्चत्यच्च**
**रयिर्वा एतत् यन्मूर्तं चामूर्तं च**

एतेषां मन्त्राणां प्रामाण्येन आविर्भूतं वर्तते आगमशास्त्रम्।

निराकारस्य भगवतः साकारं परिकल्प्य श्रृत्युक्तैः विविधैः मन्त्रैः लोकशान्त्यर्थं विश्वशान्त्यर्थं च यज्ञयागादीनां प्रतिनिधित्वेन निर्दिष्टाः अर्चनोत्सवादयः अस्मिन् कलौ युगे अवश्यं सर्वैः अनुष्ठेयाः। अर्चनोत्सवादि क्रियासर्वस्वमेव आगमशास्त्रं भवति।----------- तत् आगमशास्त्रं प्रति विचारयामः।

**आगमाः**

आङ्पूर्वकाद् गत्यर्थकाद् गम्लृधातोः ग्रहवृदृनिश्चिगमश्च। इत्यनेन पाणिनिसूत्रेण आङ् इत्युपसर्गपूर्वक गम् धातोः अच् प्रत्ययात् आगमशब्दः निष्पन्नः।

**आगमः नाम आगम्येते प्रमीयेते हिताहितप्राप्तिपरिहारावनेन आगमः**

**आगच्छन्ति बुद्धिमारोहन्ति यस्मादभ्युदयनिःश्रेयसोपायाः स आगमः** इति वाचस्पतिमिश्रेण प्रतिपादितं लोककल्याणाय मोक्षप्रदायकाय निर्दिष्टः शास्त्रविशेषः आगम इति।

**आप्तवचनादाविर्भूतः अर्थविशेषसंवेदनरूपः आगमः।**

**अमुं ब्रह्माणं गमयतीति आगमः।**

**आसमन्तात् गम्यन्ते व्युत्पाद्यन्ते अनेनेति ।** संसारसागरे मज्जनोन्मज्जनस्य जीवजातस्य मोक्षप्राप्त्यर्थम् उपदिष्टं यत् शास्त्रं वर्तते तदेव आगमशास्त्रमिति निष्कर्षः।

**सृष्टिश्च प्रलयश्चैव देवतानां तथाऽर्चनम्।**

**साधनञ्चैव सर्वेषां पुरश्चरणमुच्यते ।।**

**षट्कर्मसाधनञ्चैव ध्यानयोगश्चतुर्विधः ।**

**सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदुर्बुधाः ।।** इति ।

सृष्टि-प्रलय-देवतार्चन-साधन-मन्त्रपुरश्चरण-वश्याकर्षणविद्वेषणमारणमोहनोच्चाटनेति षट्कर्मणां साधन-चतुर्विधध्यानयोगेति सप्तभिः लक्षणैः युक्तः आगम इति आगमशब्दस्य व्युत्पत्तिः शब्दवाचस्पत्ये दृश्यते।

वेदोपबृंहकग्रन्थराशिरेव आगमशब्देन व्यपदिश्यते इति अस्माभिः निर्णेतुं शक्यते। आगमः तन्त्रमित्यपि प्रथते। तन् धातोः ष्ट्रन् प्रत्ययेन तन्त्रशब्दः निष्पद्यते । तन्त्रं नाम भगवदाराधनोपदेशक ग्रन्थसर्वस्वम् इत्यर्थः।

अचिन्त्य-दिव्य-अद्भुत-दृश्यादृश्य-नित्य-अमल-स्वच्छ-अतीन्द्रिय-सर्वव्यापक-नित्य-विभु-सर्वगत-प्रणवात्मकादिविशेषैः विराजमानस्य परमात्मनः साकारपरिकल्पनाय सर्ववर्णाश्रमजनसाफल्याय ज्ञानसंसाधनाय चाध्यात्मिकग्रन्थसर्वस्वमेव आगममिति दर्शनशास्त्रेषु इदं अद्वितीयं स्थानं वहतीति नास्ति विप्रतिपत्तिः। निराकारस्य भगवतः साकर परिकल्पने उद्दिष्टः साधनग्रन्थसमूहः आगमः भवति । अयं च आगमः देवताभेदेन बहुविधः भवेत्। आगमभेदान् पश्यामः।

**"पाञ्चरात्रागमे जितन्ते स्तोत्रस्य प्राधान्यता"** दरीदृश्यते । स्तोत्रमिदं मन्त्रसदृशं भवति । ऋग्वेदस्य खिलभागे इदं विद्यते इति वैदिकाः वदन्ति[i]। एकतादि ऋषयः श्वेतद्वीपे नारदाय उपदिष्टवन्तः इति नारदः ब्रह्मणे ब्रह्मद्वारा इतिहासपुराणेषु इदं स्तोत्रं लोके प्रसारितमभूदिति विमर्शकाः वदन्ति[ii]। स्तोत्रमिदं नारदीयसंहितायां अहिर्बुध्न्यसंहितायां च स्पष्टमुपदिश्यते ।

International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665
IJRRAS

पाञ्चरात्रप्रयोगग्रन्थेषु आवाहनसमये बाह्ययागसमये स्नपनविधै स्तोत्रमिदं अवश्यं पठनीयमिति उपदिश्यते[iii]। नारदीयसंहितायां[iv]

**जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन।**

**नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज।**

**मन्त्रोऽयमुपचारस्य सर्वसिद्धिकरः शुभः।।** इति उपदिश्यते।

अहिर्बुध्न्यसंहितायां[v]तु जितन्ताख्यमन्त्रार्थनिरूपणं पुण्डरीकाक्षशब्दविचारः परार्थनिरूपणम् अक्षराणां विशेषार्थाः जगच्छब्दविवक्षितसर्वचेतनशेषित्वपरत्ववर्णनं च विशेषतया निरूपितं वर्तते।

**जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन।**

**नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ।।**

**नमस्ते वासुदेवाय शान्तानन्तचिदात्मने।**

**अजिताय नमस्तुभ्यं षाड्गुण्यनिधये नमः ।।**

**महाविभूति संस्थाय नमस्ते पुरुषोत्तम।**

**सहस्रशिरसे तुभ्यं सहस्रचरणाय ते ।।**

**सहस्रबाहवे तुभ्यं सहस्रनयनाय ते।**

**अमृताय नमस्तुभ्यमेकमूर्ताय ते नमः ।।**

**अनेकमूर्तये तुभ्यमक्षराय च ते नमः।**

**..........................................**

**..........................................**

**बुद्धियोगं च मे देहि येन त्वामुपयाम्यहम् ।**

**इति विज्ञाप्य देवेशं वैश्वदेवं स्वधामनि ।।**

इति जितन्तेस्तोत्रं पाद्मसंहितायां[vi] सुस्पष्टं विव्रियते। अनेन कारणेन वेदप्रमाणानुसारं पाञ्चरात्रं निर्दिष्टं भवतीति नैव सन्देहलेशः।

**पाञ्चरात्रे परतत्त्वस्वरूपः वासुदेवः**

पाञ्चरात्रागमे परतत्त्वस्वरूपः परवासुदेव इति स्पष्टमभिवर्ण्यते।

**वासुदेव एव औपनिषदः पुरुषः** इति आगमप्रामाण्यग्रन्थः[vii] अपि उपदिशति । स च वासुदेव एव जगज्जन्मस्थितिध्वंसानां मूलभूतः आराध्यदेव इति स एव श्रीमन्नारायण इति च यामुनाचार्येण उपदिश्यते ।

**श्रुतिस्मृति प्रसिद्धेन वासुदेवाभिभाषितम्...... तथाहि पौरुषे सूक्ते श्रूयते तस्य वैभवम् ।........ तथा स ब्रह्म स शिव इति तद्विष्णोःपरमं पदम्......मनुरप्याह तद्यथा नारायणपरोऽव्यक्ता दण्डमव्यक्त संभवम्**[viii]। इति

वासुदेव एव ज्ञानैश्वर्यशक्तिबलवीर्यतोजोमयविग्रहः षाड्गुण्यस्वरूपः अद्वितीयः परव्यूहविभवभेदेन राराजमानः भवतीति सात्वतसंहितायाम्[ix]अहिर्बुध्न्यसंहितायां[x] पाद्मसंहितायां[xi] च स्पष्टमुपदिश्यते। अनेन कारणेन पाञ्चरात्रागमे परवासुदेव एव वर्णितं तत्त्वं प्रधानं भवतीति निष्कर्षः।

International Journal of Recent Research and Applied Studies
ISSN : 2349-4891
Impact Factor : 4.665

i पाञ्च.परि पृ ४३

ii पाञ्च.परि पृ ४

iii क्रियाकै.च

iv क्रियाकै.च २.६१-६२

v परम पु.सं - ५३ अध्यायः

vi चर्या.पा. १३.४३-६४

vii चर्या.पा. पृ २३

viii आग.प्रा पृ २२

ix परम पु.सं - १.२३

x परम पु.सं -५.२८-२९

xi परम पु.सं - २.१६-१७